**न्यक्कृत**–धिक्कृतः । आचा० १८२ ।
**न्यक्षं**–विस्तारः प्रत्यक्षं च । उत्त० ६६ । आव० ८४२ । निष्कृष्टम् । आव० २५६ ।
**न्यग्रोधः**–वटवृक्षः । भग० ६५० ।
**न्यग्रोधपरिमण्डलं**–न्यग्रोधवत् परिमण्डलं यस्य तत्, यथा न्यग्रोध उपरि सम्पूर्णप्रमाणोऽधस्तु हीनः तथा यत्संस्थानं नाभेरुपरि सम्पूर्णप्रमाणं अधस्तु न तथा तन्न्यग्रोधपरिमण्डलम् । प्रज्ञा० ४१२ ।
**न्यग्रोधसंस्थानं**–नाभित उपरि सर्वावयवाश्चतुरस्रा–लक्षणाऽविसंवादिनोऽधस्तु तदनुरूपं यत्र भवति तत् । सम० १५० ।
**न्यायोद्ग्रहण**–शब्दान्तरापेक्षया विशेषः । ठाणा० ४६४ ।
**न्यासः**–निक्षेपः, स्थापना । ठाणा० ४ ।

## प

**पंक**–महान् कर्दमः पङ्कः । प्रश्न० ६५ । पङ्कः । औप० ८६ । पङ्कः–स्वेदार्द्रमलरूपः । व्य०व० १२२ (?) । पङ्कः–कलरूपः । पिण्ड० १०२ । पङ्कः–कर्दमः । ठाणा० ३२८ । पङ्कः–पापम् । पङ्कं–पङ्कयतीति पापम् । सूत्र० ३३१ । पङ्कः–मलः एव स्वेदेनार्द्रीभूतमलः । भग० ३७ । पङ्कः–कर्दमः । भग० ३०७ । जं० प्र० १६६ । प्रस्वेद उल्लि । नि० चू० प्र० ११० अ ।
**पंकगति**–पङ्के–उदके वाऽतिदुस्तरं यदात्मीयं केनापि सह्रोद्धृत्य तद्बलेन गच्छति सा पङ्कगति, विहायोगतेः षोडशमोभेदः । प्रज्ञा० ३२७ ।
**पंकजल**–पङ्कजलं–पङ्कप्रधानं जलं यत् कमलमुच्यते । उत्त० ३६१ ।
**पंकप्पभा**–पङ्कप्रभा–चतुर्थनारकपृथ्वी । प्रज्ञा० ४३ । पङ्कस्य प्रभा यस्यां सा । पङ्काभद्रव्योपलक्षिता वा । अनु० ८६ ।
**पंकबहुल**–पङ्कबहुलं–कर्दमबहुलो विशेषो भूभागः । रत्नप्रभायाः द्वितीयकाण्डः । जीवा० ८६ ।
**पंकभीस**– । नि चू० द्वि ७६ अ ।
**पंकाययणाभि**–पङ्कायतनां–यत्र पङ्कीलदेशे लोका धर्मार्थं लोटनादिक्रियां कुर्वन्ति । आचा० ४११ ।
**पंकावई**–पङ्कावतीनाम महाविदेहे कुण्डः । जं० प्र० ३४६ । पङ्कोऽतिशयेनास्त्यस्यामिति पङ्कावती । महाविदेहे नदी । जं० प्र० ३४६ ।
**पंकावती**– । ठाणा० ८० ।
**पंकिता**–जल्लमल्लेन ग्रस्ता । नि० चू० प्र० १०८ आ ।
**पंकिय**–आर्द्रमलोपेतम् । भग० २५४ ।
**पंखाल**–पक्षवतीः । बृ० प्र० १८ आ ।
**पंगु**–गन्तुमसमर्थः, पदे जङ्घाहीनः पङ्गुः । नि० चू० द्वि० ४३ आ ।
**पंगुल**–पङ्गुलः–गमनासमर्थजङ्घः । प्रश्न० २५ । पङ्गुलः–चङ्क्रमणासमर्थः । प्रश्न० १६१ ।
**पंचंगुलि**–पञ्चाङ्गुली । जीवा० २२७ । वल्लीविशेषः । प्रज्ञा० ३२ ।
**पंच**–पण्णगं । नि० चू० प्र० ४४ अ ।
**पंचकुल**– । सूर्य० २८२ ।
**पंचजण्णं**–पाञ्चजन्याभिधानं सङ्खम् । ज्ञाता० २१८ ।
**पंचट्ठी**–पञ्चाष्टा–पञ्चमुष्टिः । अन्त० ४६२ ।
**पंचतव**–पञ्चतवः–पञ्चाग्नितपः, यत्र चतुर्ष्वपि दिक्षु चत्वारोऽग्नयः पञ्चमश्च तपनस्तल्लोके प्रसिद्धम् । उत्त० ५६८ ।
**पंचनियम**–पञ्चनियमास्तु–शौचसंतोषतपःस्वाध्यायेश्वरप्रणिधानानि । ज्ञाता० १०५ ।
**पंचपुल**–पञ्चपुलः । विपा० ८१ ।
**पंचमंगल**–पञ्चमंगलं–नमस्कारम् । आव० ४५४ ।
**पंचमंगलयं**–पञ्चमङ्गलकं–नमस्कारम् । ओघ० २०३ ।
**पंचम**–पञ्चानां षड्जादिपञ्चस्वराणां निर्देशक्रममाश्रित्य पूरणः पञ्चमः स्वरविशेषः । पञ्चसु–नाभ्यादिस्थानेषु मातीति वा पञ्चमः स्वरः । अनु० १२७ ।
**पंचमासिआ**–पञ्चमी भिक्षुप्रतिमा । सम० २१ ।
**पंचमासिए**– । आचा० ३२७ ।
**पंचमी**–पञ्चमभिक्षुप्रतिमा । ज्ञाता० ७२ ।
**पंचमुट्ठियं**– । ज्ञाता ६० ।
**पंचरूविता**–पञ्चानां रूपाणां गर्जितविद्युज्जलवाताभ्रलक्षणानां समाहारः पञ्चरूपं तदस्ति येषां ते पञ्चरूपिका उदकगर्भाः । ठाणा० २८७ ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

नो शब्दस्य मिश्रवचनत्वात् । ठाणा० १०३ । इति मन्यमाना: नोशब्दो देशप्रतिषेधे । आचा० २५० । नोसद्दो मिस्सभावम्मि–नोशब्दश्चाऽत्र मिश्रवचन: । विशे० ३६ । नो इह सर्वनिषेधवचन: । विशे० ३२ । नोशब्दो देशनिषेध वचनविवक्ष्यते: । विशे० ३३ ।

**नोइंदिओवउत्ते**–यदा तमेवार्थमिन्द्रियेण दृष्ट्वा विचारय-त्योधसञ्ज्ञयापि तदा स नोइन्द्रियोपयुक्त: । प्रज्ञा० १५६ ।

**नोइंदिय**–नोइंद्रियं–मन: । ठाणा० ३५६ । प्रज्ञा० ३११ । उत्त० ४०२ ।

**नोइंदियअत्थावग्गहो**–नोइन्द्रियेण भावमनसाऽर्थावग्रहो–द्रव्येन्द्रियव्यापारनिरपेक्षघटाद्यर्थस्वरूपपरिभावनाभिमुख: प्रथममेकसामायिको रूपाद्यूर्ध्वाकारादिविशेषचिन्ताविकलोऽनिर्देश्यसामान्यमात्रचिन्तात्मको बोधो नोइन्द्रियार्थावग्रह: । प्रज्ञा० ३११ ।

**नोइंदियगिज्झु**–नोइन्द्रियग्राह्य: नो–न इन्द्रियैः–श्रोत्रादिभिर्ग्राह्य:–सवेद्य: । नोइन्द्रियेण–मनसा ग्राह्यो वा । उत्त० ४०२ । इन्द्रियग्राह्य:, नो इति प्रतिषेधे, इन्द्रियैः–श्रोत्रादिभिर्ग्राह्य:–संवेद्य । इन्द्रियाग्राह्य: । उत्त० ४०१ ।

**नोइंदियत्थ**–औदारिकादित्वार्थपरिच्छेदकत्वलक्षणधर्म्मद्वयोपेतमिन्द्रियं तस्यौदारिकादित्वधर्मलक्षणदेशनिषेधात्, मन:, साहश्यार्थत्वाद्वा नोशब्दस्यार्थं परिच्छेदकत्वेनेन्द्रियाणां सहशमिति तत्सहचरमिति वा नोइन्द्रियं–मनस्तस्यार्थो-विषयो–जीवादि: नोइन्द्रियार्थ इति । ठाणा० ३५६ ।

**नोइन्द्रियदुष्प्रणिहितकायिकी**–नोइन्द्रियेण- मनसा दुष्प्रणिहितस्याशुभसङ्कल्पद्वारेण दुर्व्यवस्थितस्य क्रिया, दुष्प्रणिहितकायिकीक्रियाया द्वितीयो भेद: । आव० ६११ ।

**नोइन्द्रियसंयम**–कषायादीनां निग्रह: । विशे० ५०२ ।

**नोउवसंतं**–नोपशान्तं–अनिष्टादिव्याख्यातमेवैकार्थं वा । भग० ९० ।

**नो एवं भवइ**–नैतद्भवति–नैतत्कल्पते । आचा० २४४ ।

**नो कम्मं**–वेदितरसं कर्म नो कर्म । भग० ३०२ ।

**नो कर्म द्रव्यकर्म**–लेप्यकर्मादिकम् । उत्त० ६४० ।

**नोकर्म्मद्रव्यकषाय:**–बिभीतकादय: । आचा० ९१ ।

**नोकर्मद्रव्यलोभ:**–आकारमुक्ति:, चिक्कणिका । आव० ३९७ ।

**नोकर्म्मभावक्षण:**–आलस्यमोहवर्णवाद: । आचा० ११० ।

**नोकषायता**–कषायसहचारिता । प्रज्ञा० ४६९ ।

**नोकसाय**–कषाय: क्रोधादिभि: सहचरा नोकषाया: । ठाणा० ४६९ ।

**नोछक्कसमज्जिया**–नोषट्कं–षट्काभाव: ते चैकादय: पञ्चान्तास्तेन नोषट्केन एकाद्युत्पादेन ये समर्जितास्ते । भग० ७९७ ।

**नोजीवा**–गृहकोकिलच्छिन्नपुच्छादय: । आव० ३१९ ।

**नोजुगं**–नोयुगं–नोशब्दो देशनिषेधवचन: किञ्चिदूनं युगम् । सूर्य २०६ ।

**नोडुं**–गिहं । नि० चू० तृ० ८ (?) ।

**नोतह**–अन्यस्तु नो तथैवान्यथापीत्यर्थो: नोतथ: । ठाणा० २१४ ।

**नोदंसणायार**–नोदर्शनाचार:–चारित्रादि: । ठाणा० ६५ ।

**नोपरीत्त**–नोअपरीत्त:–सिद्ध: । जीवा० ४४६ ।

**नोभव**–भवव्यतिरिक्त: कर्मसम्पर्कसम्पाद्यनैरयिकत्वादि-पर्यायरहित: । प्रज्ञा० ३२८ ।

**नोभवसिद्धिकानोअभवसिद्धिक**–सिद्ध: । जीवा० ४४ ।

**नोमालियापुड**–गन्धद्रव्यविशेष: । ज्ञाता० २३२ ।

**नोल्लेऊणं**–नोदयितुं–उल्लंघयितुम् । बृ०द्वि० २०६, २७६ ।

**नोशब्द**–देशवचन: । व्य० प्र० ४ आ । सर्वनिषेध एव । ठाणा० १०३ । साहचर्यार्थ: । ठाणा० ४६९ ।

**नोसज्झोपरुत्त:**–आहाराद्युपभोगेऽपि तत्रानभिषक्त: । भग० ९०५ ।

**नोसद्दो**–नोशब्दो मिश्रभावे मिश्रवचनोऽपि । विशे० ४२१ ।

**नोसन्ना**–नोसंज्ञा । भग० ९०५ ।

**नोसन्नोवउत्ता**–नोसञ्ज्ञोपयुक्ता आहारादिषु गृद्धिवर्जिता: । भग० ९३० । पुलाक निर्ग्रन्थस्नातका नोसञ्ज्ञोपयुक्ता: । भग० ९०५ ।

**नोसुयंगं**–नोश्रुताङ्गं–अश्रुताङ्गम् । उत्त० १४४ ।

**नोहव्वाए नोपाराए**–यो हि मध्ये महानदीपूरं निमग्नो भवत्यसौ नारातीय तीराय नापि पारे महानदी पूरम् । आचा० ११३ ।

**न्यक्कार:**–तिरस्कार: । उत्त० ३७६ ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org